**Shikshan Sanshodhan : Journal of Arts, Humanities and Social Sciences** ISSN(o): 2581-6241
Monthly, Peer-Reviewed, Refereed, Indexed Journal Impact Factor: 9.134
Volume - 8, Issue - 12, December - 2025

DOIs:10.2018/SS/202512006 --:-- Research Paper / Article / Review

# श्रुतेः तन्त्रस्य च जगत्सृष्टेः वर्णनायां सांख्यतत्त्वस्य समर्थनम्

**[1] Dr. Jyoti Kumari & [2] Rajibul Khan**
[1.] Assistant Professor, P.G Dept. of Sanskrit, Rajendra College, Chapra, Saran, Bihar
[2.] Research Scholar, Dept. of Sanskrit, Jai Prakash University, Chapra, Saran, Bihar
Email - [1] kumari.jyoti208@gmail.com, [2] rajibulkhan.10109@gmil.com

***शोधसारः*** सांख्यदर्शने जगत्सृष्टेः वर्णनायां पञ्चविंशतितत्त्वानामालोचनामस्ति। अस्य कारणं अन्वेषणं कृत्वा दृश्यते यत्, चैतन्यः जडश्च अर्थात् पुरुषः प्रकृतिश्च इत्येतत् तत्त्वद्वयं मौलिकतत्त्वरूपेण गृहीतम्। चैतन्यस्वरूपपुरुषः नित्यः, शुद्धः, निर्विकारः कूटस्थश्च इत्येतत् सिद्धान्तं स्वीकृत्य सांख्यशास्त्रं उपनिषदोक्तस्य ब्रह्मणः परमात्मनः वा स्वरूपेण सह पुरुषस्य ऐक्यं प्रतिपादयति। अत एव मन्यते यत्, उपनिषदोक्तब्रह्मणः परमात्मनः वा धारणा सांख्यमतस्योपरि विशेषरूपेण प्रभावं व्यस्तर्यते। अपरस्यां दिशि, तन्त्रोक्तजडवर्गस्य अर्थात् प्रकृतेः आरभ्य अन्यप्राकृतिकवस्तुसमूहस्य धारणा अपि सांख्यमते गृहीता। तन्त्रे अविद्या, माया इत्यादयः पृथक्तत्त्वरूपेण उल्लिखिताः। परन्तु दार्शनिकपद्धतौ युक्तिपरिशीलितविचार्य्येण सांख्यशास्त्रं अविद्यादीन् बुद्धितत्त्वस्य अन्तर्भुक्तं कृत्वा तन्त्रोक्तपदार्थतत्वानां संख्या ह्रस्यते। श्रुतौ एकं ब्रह्म एव पारमार्थिकसत्यरूपेण स्वीक्रियते। परन्तु तन्त्रस्य परशिवः चैतन्यस्वरूपं तथा सत्त्वं, रजः, तमः इति त्रिगुणात्मिका प्रकृतिः जडस्वरूपा। एतत्सिद्धान्तं स्वीकृतात् चैतन्यः जडश्चेति द्वैतसत्ता निर्धार्य्यते। व्यवहारिकजीवजगता सह संहतिं कृत्वा सांख्यशास्त्रे जडः चैतन्यश्चेति द्वयस्य यौक्तिकतां स्वीकृतात् तन्त्रमतस्य प्रभावः यथा सुपरिस्फुटः, तथैव परशिवः, ईश्वरः जीवश्च इति विभिन्नानि तत्त्वानि एकेन चेतनपुरुषरूपेण स्वीकार्य्य श्रुत्योक्तस्य सिद्धान्तस्य प्रभावोऽपि परिस्फुटः। अतः प्राचीनकाले श्रुतिमतं तन्त्रमतञ्च प्रधानरूपेण प्रचलितमासीत् तथापि सांख्यमते उभययोः मतयोः प्रभावः परिस्फुटः भवति।

***कुटशब्दाः*** अविद्या, कूटस्थ, पुरुषः, परशिवः, प्रकृति, परमात्मा, ।

जगतः सृष्टिसिद्धान्तविमर्शे दृश्यते यत् केवलं श्रुतिः एव परमतत्त्वस्य अन्वेषणं प्रदातुं न शक्नोति, एतदतिरिक्तं तान्त्रिकमतानुयायिनः तन्त्रमपि तादृशस्य तत्त्वस्य ज्ञापकरूपेण स्वीकुर्वन्ति। अतिप्राचीनकालात् भारतवर्षे श्रुतेः तन्त्रस्य च आध्यात्मिकसाधनायाः धाराद्वयं प्रवर्तितं स्तः। एतयोः धारयोः पाचीनत्वमपि स्वीकृतौ भवतः । अतीन्द्रियतत्त्वस्य सूत्ररूपेण एते मतैव स्वीकार्यम्। अतः महर्षिकपिलेन श्रुतिमतनुसृत्य अथवा तन्त्रमतस्य सिद्धान्तानुसारेण परमतत्त्वस्य निरूपितम् अस्ति नवा, इति अत्र आलोच्यविषयः।

आदौ कपिलप्रवर्तितसांख्यमतेन सह श्रुतिमतस्य सामञ्जस्य विषये विश्लेषणं कृत्वा उच्यते यत्, यदि महर्षिकपिलप्रवर्तितस्य सांख्यमतस्य संकेतं श्रुतिवाक्ये प्राप्यते, तर्हि एतदवश्यमेव वक्तुं शक्यते यत्, श्रुतेः सिद्धान्तमनुसृत्य एव सांख्यमतं प्रवर्तितम्। अतः आदौ एव अन्वेषणस्य प्रयोजनमस्ति यत्, सांख्यस्य मूलसिद्धान्तस्य परिचयः श्रुतिवाक्यस्य मध्ये अस्ति नवा इति।

सांख्यस्य मूलसिद्धान्तस्य भागद्वयमस्ति, तौ च यथा- जडः चैतन्यश्चेति। तयोर्मध्ये चेतनात्मकभागः पुरुषः आत्मा वेति नाम्ना अभिहितः। एषः आत्मा नित्यशुद्धं मुक्तं, सर्वविकाररहितं स्वप्रकाशकं चैतन्यस्वरूपञ्च। अथ प्रकृतिः भवति जडात्मकम्। एषा प्रकृतिः जागतिकजडपदार्थस्य मूलोपादानरूपेण स्वीकृता। एषा प्रकृतिः परिणामशीलश्च सर्वः जडपदार्थः एव प्रकृतेः परिणामसम्भूतः। पुरुषः चेतनस्वरूपं तथापि सः निष्क्रियः निर्गुणश्च, परन्तु बहु अर्थात् प्रत्येके शरीरभेदे पुरुषस्य भेदः स्वीकृतः भवति। एतयोः प्रकृतिपुरुषयोः सम्वन्धेन एव संसारं बन्धनं वा भवति। पुरुषः उदासीनः, नित्यः मुक्तश्च तथापि

अनादिकालादेव अविवेकप्रसूतात् भोगवासनात् प्रकृत्या सह अङ्गाङ्गीभावसम्वन्धं मन्यते। यावत् एतस्य भेदस्य प्रतीतिः भवति तावदेव संसारप्रक्रिया वन्धनप्रक्रिया वा चलति। परन्तु तत्त्वसाक्षात्कारेण परस्परस्य आत्यन्तिक भेदवोधः स्पष्टीभवति। तथा बन्धनस्य निवृत्तिः भवति। भेदसाक्षात्कारादेव पुरुषस्य अविवेकः दुरिभूतं भवति, स्वयञ्च स्वस्वरूपे प्रतिष्ठितः भवति। एतदेव संक्षेपेण सांख्यदर्शनस्य वक्तव्यम्। एतद्वक्तव्यं विश्लेशणेन प्रतीयते यत्, पुरुषः अविवेकस्य गाढतमसा आच्छन्नां तत्प्रकृतिं आत्मनः यथार्थभोग्यं मन्यते, तया सह आसक्तश्च भवति। यदा पुरुषस्य अविवेकः दूरीभुतः तदा प्रकृत्या सह आत्मनं आसक्तं न करोति। अर्थात् तदा तस्य प्रकृत्या सह भोगजनकः आरोपितः सम्वन्धः न तिष्ठति। सांख्यस्य एषः वहुपुरुषवादः सत्त्वरजस्तमोगुणात्मिका प्रकृतिश्च श्वेतश्वतरोपनिषदः श्रुतौ स्पष्टरूपेण वर्णितौ। तद्वहुप्रसिद्धा श्रुतिः भवति-

अजामेकं लोहित शुक्ल कृष्णां बह्वी प्रजाः सृजमानां स्वरूपाः।
अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः ।।[१]

प्रकृतिः स्वस्यैव बहुवः प्रजाः असृजत् इति अस्याः श्रुतेः अर्थः। तेषु कश्चित् लोहितः (रजः), कश्चित् शुक्लः (सत्त्वम्), कश्चित् कृष्णविशिष्टश्च (तमो)। एकः अज्ञानजीवः एतदिन्द्रियग्राह्यजगत् प्रति आकृष्टः भवति तच्च भोगयति। परन्तु अपर मुक्तः जीवः पूर्वाभिज्ञतया ज्ञातः भवति यत्, एतत् मूलजगत् क्षणस्थायी, अतः सः जगत् परित्यजति। अत्र पदार्थद्वयं निर्दिशति- सत्त्वरजस्तमोगुणविशिष्ट प्रकृतिः, भोक्तुः पुरुषस्य बहुत्वञ्चेति। एषः श्रुतिमन्त्रः तत्सांख्यमतस्यैव प्रतिध्वनिः इति अनायासेन वक्तुं शक्यते।

त्रिगुणस्य उल्लेखं कुर्वन्तः सत्त्वं, रजः, तमश्च इति क्रमेण उल्लिखामः। परन्तु उपनिषदि उक्तक्रमं भवति यत् रजः, सत्त्वम्, तमश्चेति (लोहितः, शुक्लः, कृष्णः) एषः क्रमः यत् किमपि भवति वस्तुतः सृष्टिः, स्थिति, प्रलयश्चेति क्रमं स्मृत्वा अत्र पारम्पारिकः क्रमः परिवर्तितः भवति। अस्मिन् उपनिषदि उक्तमन्त्रे सांख्यदशनस्य सृष्टिविषयकभावनायाः इङ्गितं प्राप्यते। सांख्यमते सृष्टिः भवति अभिव्यक्तिः, सैव रजोगुणस्य कार्यम्। स्थिति भवति प्रकाशः, सः सत्त्वगुणस्य कार्यम् तथा प्रलयः विनाशः वा आवरणं, तच्च तमोगुणस्य कार्यम्। अतः उच्यते यत्, लोहित-शुक्ल-कृष्णाः विश्वस्य सृष्टि-स्थिति-प्रलयानां हेतवः। सांख्यमते प्रकृतिः स्वरूपतः त्रिगुणात्मिका, एषा प्रकृति एव सृष्टेः, स्थितेः प्रलयस्य च हेतुः।[२] श्वेताश्वतरोपनिषदः चतुर्थे अध्याये 'अजामेकम्' इति मन्त्रस्यार्थः एतदपि प्रमाण्यते यत्, लोहितशुक्लकृष्णाणां अर्थात् सत्त्वरजस्तमोगुणानां साम्यावस्था एव प्रकृतेः स्वरूपम्। अतः अस्याः उपनिषदः प्रथमेऽध्याये उक्तेन स्वगुणेन निगुढा (स्वगुणैर्निगूढाम्)[३] प्रकृतिः उक्ता। एतया प्रकृत्या सांख्योक्ता अव्यक्ता प्रकृतिः एव निर्दिश्यते।

अस्या उपनिषदः प्रथमस्याध्यायस्य चतुर्थमन्त्रे सर्वं जगत् चक्ररूपेण वर्णितम्। अत्र ईदृशः कतिपयः शब्दः अस्ति येन सांख्यमतमेव समर्थयते। विषयेऽस्मिन् श्रुतिमन्त्रः अस्ति-

तमेकनेमिं त्रिवृतं षोडशान्तं शतार्धारं विंशतिप्रत्यराभिः।
अष्टकैः षड्भिर्विश्वरूपैकपाशं त्रिमार्गभेदं द्विनिमित्तैकमोहम्॥[४]

अत्र तत्वज्ञपण्डिताः सृष्टेः कारणरूपेण ब्रह्मचक्रं प्रत्यक्षं कुर्वन्ति। एतद्व्रह्मचक्रस्य विशेषनरूपेणः उच्यते यत्, 'एक नेमिं त्रिवृतं षोडशान्तम्' इति। अत्र 'नेमिम्' इति शब्दस्यार्थः रथचक्रादेः प्रान्तभागः। एषः नेमिः अनन्तः आकाशः अर्थात् शेषः सीमा। आकाशः एव स्थूलपदार्थस्य शेषः सीमा इत्युच्यते। यतः अन्यस्मात् सर्वास्मात् स्थूलपदार्थात् अपेक्षया आकाशः महत्तरपरिमाणविशिष्टः अतः आकाशः सृष्टपदार्थानां शेषः चरमसीमा वेति वर्ण्यते। 'त्रिवृतम्' इति शब्देन सत्त्वम्, रजः, तमश्चेति गुणत्रयमेव अवगम्यते। एतेन गुणत्रयेन ब्रह्मचक्रः आवृतः। एतस्य गुणत्रयस्य प्राध्यानात् एतज्जगत् सर्वदा विद्यते। ततः 'षोडशान्तम्' इति शब्देन क्षित्यपादिपञ्चमहाभूतानि, पञ्चकर्मेन्द्रियाणि, पञ्चज्ञानेन्द्रियाणि, मनश्चेति षोडशः पदार्थाः नेमेः विशेषणरूपेण व्यवह्रियन्ते। पश्चात् 'शतर्द्धारम्' इति शब्दस्य व्याख्यायां दृश्यते यत्, शतसंख्याकस्य अर्धं अर्थात् पञ्चाशत्शलाकाविशिष्टनेमेः अरायाः वा उल्लेखः अस्ति। अस्य पञ्चाशत् संख्यापूरणस्य व्याख्यानवसरे श्वेतश्वतरोपनिषदः भाष्ये उच्यते यत्- 'पञ्चाशत्प्रत्यय भेदविपर्य्ययाशक्तिस्तुष्टि सिद्धाख्या अरा इव यस्य तं शतार्द्धारम्'[५] इति। विपर्ययः मिथ्याज्ञानं वा पञ्च प्रकाराणि, अष्टविंशतिः अशक्तयः, नव प्रकाराः तुष्टयः, अष्ट प्रकाराः सिद्धिश्च। अते पञ्चाशत् चक्रस्य अराः शलाकाः वा। उपर्युक्तश्रुतिमन्त्रस्य भाष्यस्य अनुरूपदृष्टान्तः लक्ष्यते सांख्यकारिकायां-

पञ्च विपर्ययभेदा भवन्त्यशक्तिश्च करणवैकल्यात् ।
अष्टाविंशतिभेदा तुष्टिर्नवधाऽष्टधा सिद्धिः ॥[६]

अपि च कठोपनिषदः भिन्नेषु भिन्नेषु मन्त्रेषु सांख्यसिद्धान्तिततत्त्वानाम् उल्लेखऽस्ति, उदाहरणं यथा 'महतः परमव्यक्तमव्यक्तात् पुरुषः परः'[७] इत्यस्य अर्थः महतः अव्यक्तः श्रेष्ठः। अव्यक्तात् पुरुषः श्रेष्ठः। अस्यां श्रुत्यां महत्, अव्यक्तः

**Shikshan Sanshodhan : Journal of Arts, Humanities and Social Sciences** ISSN(o): 2581-6241
Monthly, Peer-Reviewed, Refereed, Indexed Journal Impact Factor: 9.134
Volume - 8, Issue - 12, December - 2025

पुरुषश्च यन्नाम्नि यत्क्रमे च वर्णिताः तदेव सांख्यशास्त्रे परिलक्ष्यते। कठोपनिषदि एतदपि उच्यते यत् - शरीरेण, इन्द्रियेण मनसा च आत्मा भोक्तारूपेण परिणतं भवति, असंयतेन तदिन्द्रियेणेव पुरुषः संसारीरूपेण परिगण्यते।[८] अपि च अस्याम् उपनिषदि उच्यते यत्, इन्द्रियात् श्रेष्ठः इन्द्रियस्य विषयः
(रूपरसादयः), इन्द्रियस्य विषयात् श्रेष्ठं मनः, मनसः श्रेष्ठा बुद्धिः, बुद्धेः श्रेष्ठं तन्महान् आत्मा।[९] उपनिषदः एषा सर्वा उक्तिः सांख्यसिद्धान्तेन सह एवमेव संगतं यत्, एतेन निश्चितरूपेण प्रतीयते यत्, एतत्श्रुतिसिद्धान्तमाश्रित्य एव महर्षिणा कपिलमुनिना सांख्यशास्त्रं प्रवर्तितम्।

कठोपनिषदि एतदपि उच्यते यत्, अनित्येषु यन्नित्यम्, नित्येषु वा यन्नित्यम्, चेतनेषु यच्चेतनः, यश्च एकोऽपि बहुभूतानां काम्यवस्तु प्रयच्छति। यत्किमपि व्यक्तम्, प्रकाशमयं तस्य गभीरे अव्यक्तनित्यस्वरूपं विद्यते। पुनः सर्वेषां काम्यवस्तुनां लयः भवति नित्यचैतन्ये। एतस्य नित्यस्वरूपस्य अनुभवः यस्य भवति, सः एव शाश्वतशान्तिः प्राप्नोति।[१०] प्रसङ्गेऽस्मिन् सांख्यदर्शने दृश्यते यत्, अव्यक्तप्रकृतेः व्यक्तस्य प्रकाशमानस्य जगतः अभिव्याक्तिः भवति। पुनः कस्मिंश्चित् दिवसे प्रलयकाले एतस्यां प्रकृतौ एव व्यक्तस्य जगतः लयः प्राप्नोति। तदा चेतनः पुरुषः स्वस्वरूपेण प्रतिष्टितः भवति। सांख्यदर्शने उपनिषदः इव जडेन सह चेतनतत्त्वं एकीभूतं कृत्वा एकत्ववादस्य प्रतिष्ठां कर्तुं प्रचेष्टां न लक्ष्यते। तथापि सांख्यदर्शनस्य सत्कार्यवादे दृश्यते- सत्कारणात् सत्कार्यमुत्पद्यते। सांख्यस्य सत्कार्यवादे नित्यात् नित्यस्य प्रकाशस्य यदुनुरणनं लक्षते, तत् कठोपनिषदः उक्तश्लोकस्य मध्ये एतत्तत्त्वं बहुपूर्वमेव प्रतिविम्वितमभवत्।[११]

तन्त्रसाहित्यम् केवलं दार्शनिकमतवादम् अवलम्ब्य नतु प्रणीतम्। तथापि आध्यात्मसाधनायाः निगुढतत्त्ववर्णनाकारीषु भिन्नेषु भिन्नेषु तन्त्रेषु सृष्टितत्त्वं, मोक्षः, मोक्षप्राप्तेः उपायश्च वर्णितानि। तन्त्रस्य विभिन्न प्रकारस्य गतिः प्रकृतिश्च लक्षयित्वा अनायासेनैव उच्यते यत्, तन्त्रेऽपि दार्शनिकमतवादस्य सुष्पष्टरूपेण अभिव्यक्तयति। तन्त्रस्य मूलतत्त्वं शिवः शक्तिश्च। कतिपयेषु तन्त्रेषु शिवस्य प्राधान्यम्, पुनः कतिपयेषु तन्त्रेषु शक्तेः प्राधान्यम् स्वीकृतम्। पुनः कुत्रचित् कुत्रचित् शिवः शक्तिश्च अभिन्नौ इति कथ्यते-

शिवो देवः शिवा देवी शिवं ज्योतिरिति त्रिधा।
आलिङ्गमपि यत्ततत्वं लिङ्गभेदेन कथ्यते।।[१२]

वस्तुतः अधिकांशतन्त्राणाम्मते शक्तेः प्राधान्यम् अर्थात् सक्रियजगत्सृष्टेः सक्रियकारणरूपेण शक्तिः स्वीकृता। तदपेक्षया शिवः अपि तु उदासीनः इव दृश्यते परन्तु शिवं विना सृष्टेः सम्भावना नोल्लेखिता। सांख्यशास्त्रस्य सिद्धान्तात् तन्त्रस्य एतस्य सिद्धान्तस्य आलोचना दृश्यते। तन्त्रमते शक्तिः एव प्रकृतिः, मायाः इत्यादिशब्दैः उल्लिखिताः। प्रकृतिः अविद्याशक्तिः वा जगतः मूलोपादानरूपेण वर्णिता। प्रकृतिं सगुणरूपेण क्रियाशीलरूपेण वा वर्णानां कृत्वापि चैतन्यमयी इति अवदत्। परन्तु सांख्यशास्त्रस्य प्रकृतिः जडात्मिका। एषा चैतन्यमयी प्रकृतिः सगुणा निर्गुणा इत्यादयैः उल्लिखिताः। कुञ्जिकातन्त्रस्य प्रथमे पाटले महाशक्तेः स्वरूपसम्वन्धे उच्यते यत्, -

निर्गुणा सगुणा देवी ब्रह्मारूपा सना तनी।
चैतन्यरूपिनी देवी सर्वभूतप्रकाशिनी।।[१३]

अर्थात् ब्रह्मस्वरूपा नित्या, महमाया चैतन्यरूपिणी सा सगुणस्य,निर्गुणस्य, सर्वभूतभौतिकस्य जगतश्च मूलं कारणम्। सारदातिलकतन्त्रस्य वर्णनायां दृश्यते यत्, शिव एव सगुणः निर्गुणः इति उभौ स्वरूपौ। निर्गुणः शिवः प्रकृत्याः सम्पूर्णरूपेण भिन्नः एव, सश्चेनस्वरूपम्। सगुणः शिवः एव प्रकृतिस्वरूपः इत्युच्यते-

निर्गुणः सगुणश्चेति शिवो ज्ञेयः सनातनः।
निर्गुणः प्रकृतेरन्यः सगुणः सकलः स्मृतः।।[१४]

एषः सगुणः शिवः जगतः सृष्टिकारकम् अर्थात् प्रकृतिस्वरूपम्। सारदातिलके अस्मिन् विषये एतदपि उच्यते यत्-

परशक्तिमयः साक्ष्यात् त्रिधाऽसौ भिद्यते पुनः।
बिन्दुर्नादौ बीजमिति तस्य भेदाः समीरिताः।।
बिन्दु शिवात्मको बीजं शक्तिर्नादस्तयोर्मिथः।
समवायः समाख्यातः सर्वागमविशारदैः।।[१५]

अत्र विषयस्य तात्पर्यं भवति- परमेश्वरी शिवशक्तिमयी, अर्थात् शिवः तथा शक्तिः, पुरुषः तथा प्रकृतिः एकस्यैव परमेश्वर्य्याः रूपद्वयम्। सृष्टेः इच्छानुसारेण सा परमेश्वरी त्रिधाभागैः विभजति। तस्य प्रथमः भागः विन्दुः, द्वितीयभागस्य नाम वीजम्, तृतीयभागस्य च नाम नादः। विन्दुः एव शिवः इति नाम्ना परिचितः। वीजं भवति शक्तिः प्रकृतिः वा। शिवशक्त्योः मिलितं

**Shikshan Sanshodhan : Journal of Arts, Humanities and Social Sciences** ISSN(o): 2581-6241
**Monthly, Peer-Reviewed, Refereed, Indexed Journal** Impact Factor: 9.134
**Volume - 8, Issue - 12, December - 2025**

रूपद्वयं नादः इत्युच्यते। एषः नादः एव सृष्टेः मुख्यं कारणम्। प्रसङ्गेऽस्मिन् अत्र लक्ष्यते यत्, प्रकृतिपुरुषयोः संयोगादेव जगत् सृजति इत्येतत् सांख्यसिद्धान्तं तन्त्रमतस्य प्रतिच्छायास्वरूपम्। भेदः भवति केवलं साधनायाः क्षेत्रे उपास्यरूपेण महाशक्तेः वर्णनां कृत्वा तं एकेन चरमतत्त्वरूपेण तन्त्रे गृह्यते। परवर्तिनि पर्याये विन्दुः वीजञ्च अर्थात् शिवः शक्तिश्च इत्येषा द्वैतसत्ता गृहीता। एतयोः उभययोः संयोगादेव सृष्टिः भवति इत्येतदेव तन्त्रस्य मतम्। उपास्यरूपेण यं एकः, अद्वितीयः चैतन्यस्वरूपं वा उच्यते तस्यैव परिणतम् अंशद्वयं शिवः शक्तिश्चेति अर्थात् पुरुषः प्रकृतिश्च। एतेन सिद्धान्तानुसारेण प्रकृतिः सांख्यस्यैव न जडात्मिका। सांख्यमते पुरुषं प्रकृतिञ्च अतिरिच्य न किमपि तत्त्वमस्ति। अतः अंशेऽस्मिन् तन्त्रमतात् अपेक्षया सांख्यमतस्य पार्थक्यं सुष्पष्टम्। अतः उच्यते यत्, तन्त्रस्य पुरुषं प्रकृतिञ्च उभौ एव गृहीत्वा सांख्यदर्शनं श्रुतिवर्णितेन ब्रह्मस्वरूपेण आत्मस्वरूपेण वा सह तन्त्रोक्तस्य शिवस्य पुरुषस्य वा ऐक्यं प्रतिपादितम्। सूक्षविचारेण पुरुषात् अतिरिच्य चेतनपदार्थं अन्यं कस्यापि ग्रहनस्य प्रयोजनीयतां खण्डयित्वा केवलं पुरुषः एव चेतनः, प्रकृतिश्च जडात्मिका इत्युच्यते। अतः गङ्गायमुनयोः मिलनस्यैव श्रौतमतस्य तन्त्रमतस्य च समन्वयेन सांख्यमतवादस्य प्रादुर्भावः भवति।[१६]

सांख्यमतस्योपरि तन्त्रमतस्य आंशिकप्रभावः लक्ष्यते पदार्थतत्त्वविभागस्य विषयेऽपि। तन्त्रमते पदार्थतत्त्वविश्लेषनविषये परशुरामकल्पसूत्रे षट्त्रिंसत्तत्त्वानामुल्लेखोऽस्ति - 'षट्त्रिंसत्तत्त्वानि विश्वम्[१७] इति। एतेषां षट्त्रिंशत्पदार्थानां विस्तृतरूपेण आलोचना प्राप्यते परशुरामकल्पसूत्रस्य रामेश्वरीटीकायामुद्धृत्परमानन्दतन्त्रस्य कारिकायाम्। तन्त्रोक्तेषु षट्त्रिंशत्तत्त्वेषु द्वादशत्तत्त्वादारभ्य अवशिष्टानि सर्वाणि तत्त्वाणि सांख्ये गृहीतानि। उभययोर्मध्ये पार्थक्यं केवलम् एतदस्ति यत्, तन्त्रे परशिवः, ईश्वरादयः जीवात् स्वतन्त्रतत्त्वरूपेण गृहीताः। परन्तु सांख्यस्य परशिवः, ईश्वरः जीवश्च परस्परं भिन्नं न, एते पुरुषः इति नाम्निः एकस्य तत्त्वस्य मध्ये अन्तर्भूतः भवति।[१८]

अतः उच्यते यत्, श्रुतेः तन्त्रस्य च समन्वयसाधनेन सांख्यशास्त्रं प्रणीतम् इत्येवं चिन्तनं नतु अयौक्तिकम्। सुप्राचिनकालादेव आध्यात्मिकचिन्तननिरतभारतवर्षे श्रुतिमतस्य तन्त्रमतस्य धाराद्वयं स्वस्वगतौ प्रवाहति। तद्धाराद्वयं एकत्र समन्वयसाधनं कृत्वा आदिविदुषा महर्षिकपिलमुनिना जीवानां परमकल्यानसाधनाय सांख्यशास्त्रं प्रणीतम्।

**पादटीकाः**

१) श्वेता.उ. ४.५
२) सांख्यतत्त्वकौमुदी, सम्पा. नारायणचन्द्रः गोस्वामी, पृ: ३
३) श्वेता.उ. १.३
४) श्वेता.उ. १.४
५) श्वेता.उ.भा. १.४
६) सा.का. ४७
७ ) कठ. उ. १.३.११
८) 'आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः' कठ.उ १.३.४
९) इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः।।
मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान् परः। कठ.उ १.३.१०
१०) कठ.उ १.२.१३
११) महाभारातपुराणे सांख्यदर्शनस्य उत्तराधिकार, सम्पा. तापसीमुखार्जी, पृ: ५१
१२) तत्त्वप्रकाश. १.३, श्रीकुमारकृतब्याख्यायां लघुवृंहनीयवचनम् पृ: १७
१३) कुब्जिकातन्त्रम्. १.५४
१४) शारदातिलकतन्त्रम्. १.६
१५) तदेव. १.७-८
१६ ) सांख्यदर्शनस्य विवरणम् सम्पा. विधुभूषण भट्टाचार्यः, पृ: ६८-६९
१७) परशुरामकल्पसूत्रः. १.४
१८) सांख्यदर्शनस्य विवरणम् सम्पा. विधुभूषण भट्टाचार्यः, पृ: ७०-७१

**ग्रन्थसन्दर्भाः**

१) गोस्वामी, श्रीनारायणचन्द्रः। सांख्यतत्त्वकौमुदी। कलिकाता: संस्कृत पुस्तक भाण्डारः, १४०६ बङ्गाब्दः।

२) सेन, अतुलचन्द्रः। उपनिषद। कलिकाता: हरफ प्रकाशनी, २०१८।
३) लोकेश्वरानन्दः, स्वामी। उपनिषद। कलिकाता: आनन्द पाबलिशार्स प्राइभेट लिमिटेड, २०२०।
४) भट्टाचार्यः, विधुभूषणः। सांख्यदर्शनस्य विवरणम्। कलिकाता: पश्चिमबङ्ग राज्य पुस्तक पर्षद्, २०१७।
५) दासः, श्री ज्योतिर्लालः। कुब्जिकातन्त्रम्। कलिकाता: नवभारत पाबलिशार्स, १३८५ बङ्गाब्दः ।
६) मालवीयः, डः सुधाकरः। शारदातिलकतन्त्रम्। दिल्ली: चौखबा संस्कृत प्रतिष्ठानः ।
७) मुखार्जी, तापसी। महाभारतपुराणे सांख्यदर्शनस्य उत्तराधिकारः। कलकाता: संस्कृत पुस्तक भाण्डारः, २०१२
८) गणपतिशास्त्री, महामोहपाध्याय। श्रीभोजदेवप्रणीतः तत्त्वप्रकाशः,१९२०
९) मिश्रः, विद्यानिवास। परशुरामकल्पसूत्रम्, वाराणसी: संपूर्णानन्दसंस्कृतविश्वविद्यालयः, २०५७।